## लभेश्च। (६४/२६८२)

लभेश्च[1] अजादौ प्रत्यये शब्लिड्वर्जिते नुमागमो भवति। लम्भयति। लम्भकः। साधुलम्भी। लम्भंलम्भम्। लम्भो वर्तते[2]। अशब्लिटोः इत्येव, लभते। लेभे। अचि इत्येव, लब्धा। लभेश्च पृथग्योगकरण[3]मुत्तरार्थम्॥

## आङो यि। (६५/२८४५)

आङः उत्तरस्य लभेः[4] यकारादि[5]प्रत्ययविषये नुमागमो भवति। आलम्भ्या गौः। आलम्भ्या वडवा। प्राक् प्रत्ययोत्पत्तेः नुमि कृते विहितमदुपधत्वम् इति 'ऋहलोर्ण्यत्' (३.१.१२४/२८७२) इति[6] ण्यत्प्रत्ययः, तत्र कृदुत्तरपदप्रकृतिस्वरत्वेन अन्तस्वरितत्वं [7]भवति। यति तु पुनरुत्तरपदाद्युदात्तत्वं स्यात्[8]। आङः इति किम्? लभ्यम्[9]। कथम् 'अग्निष्टोम आलभ्यः' (मै. ३.९.५) इति? 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' (पु.प. ३५)। अथ वा [10]आलभ्यः इत्यत्र नुमि कृतेऽनुषङ्गलोपः क्रियते॥

## उपात् प्रशंसायाम्। (६६/२८४६)

उपादुत्तरस्य लभेः[11] प्रशंसायां गम्यमानायां यकारादिप्रत्ययविषये नुमागमो भवति। उपलम्भ्या [12]भवता विद्या। उपलम्भ्यानि धनानि। ण्यत्प्रत्ययान्तत्वात् अन्तस्वरितत्वमेव। प्रशंसायाम् इति किम्? उपलभ्यमस्माद् वृषलात् किञ्चित्। पोरदुपधत्वाद् यत्प्रत्ययान्तमिदम्॥

## उपसर्गात् खल्घञोः। (६७/३३०६)

उपसर्गादुत्तरस्य लभेः[13] खल्घञोः परतः नुमागमो भवति। ईषत्प्रलम्भः। सुप्रलम्भः। दुष्प्रलम्भः। घञि – प्रलम्भः। विप्रलम्भः। सिद्धे सत्यारम्भो नियमार्थः, उपसर्गादेव लभेः खल्घञोः परतो नुमागमो भवति, नान्यत्र। ईषल्लभः। लाभो वर्तते॥

## न सुदुर्भ्यां केवलाभ्याम्। (६८/३३०७)

सु दुर् इत्येताभ्यां केवलाभ्यामन्योपसर्गरहिताभ्याम् उपसृष्टस्य लभेः[14] खल्घञोः परतः नुमागमो न भवति। [15]सुलभम्। दुर्लभम्। घञि – सुलाभः। दुर्लभः। केवलाभ्याम् इति किम्? सुप्रलम्भः। दुष्प्रलम्भः। सुदुर्भ्यामिति तृतीयां मत्वा केवलग्रहणं[16] क्रियते। पञ्चम्यां हि व्यवहितत्वादेवाप्रसङ्गः। अतिसुलभम् इत्यत्र कर्मप्रवचनीयत्वादतेः केवल एव सुशब्द [17]उपसर्गः इति भवति[18] प्रतिषेधः। [19]यदा तु अतिशब्दो न कर्मप्रवचनीयः, तदा नुम् भवति एव अतिसुलम्भः इति। [20]पञ्चमीनिर्देशपक्षेऽप्येवमर्थं केवलग्रहणं कर्तव्यम्[21]॥

---

1. अङ्गस्य इत्यधिकम् क. इ. 2. इति इत्यधिकम् क. 3. उत्तरत्र लभेरेवानुवृत्तिः यथा स्यात् इत्यधिकम् क. 4. अङ्गस्य यकारादौ प्रत्यये परतः क. 5. प्रत्यये विषयभूते इ. 6. एवम् इत्यधिकम् क. 7. भवति नास्ति क. इ. 8. यतोऽनावः इत्यधिकम् क. 9. अदुपधत्वाद् यत्प्रत्ययान्तमेतत्। यि इति किम्? आलब्धा इत्यधिकम् ब. ड. इ. ई. 10. आलभ्यते क. ड. ई. ह. 11. अङ्गस्य यकारादिप्रत्यये परतः ह. 12. भवता नास्ति क. 13–14. अङ्गस्य इत्यधिकम् क. 15. सुलभः दुर्लभः इ. ई. क. 16. इह इत्यधिकम् ह. 17. उपसर्गः नास्ति क. 18. एव इत्यधिकम् क. 19. यदि तु क. 20. सुदुर्भ्याम् इति इत्यधिकम् क. 21. एव इत्यधिकम् क. ई.